# Shri TripurabhairavI Sahasranamastotram

# શ્રીત્રિપુરભૈરવીસહસ્રનામસ્તોત્રમ્

## Document Information

Text title : tripurabhairavIsahasranAmastotra

File name : tripurabhairavIsahasranAmastotra.itx

Category : sahasranAma, devii, dashamahAvidyA, stotra, devI

Location : doc_devii

Transliterated by : Muktabodha.org

Proofread by : Muktabodha.org, DPD

Description-comments : From Shaktapramoda kAlyAdidashamahAvidyAtantrAtmakaH

Acknowledge-Permission: Marjorie Woollacott, Ph.D., Digital Library Coordinator muktabodha.org

Latest update : October 2, 2014

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# શ્રીત્રિપુરભૈરવીસહસ્રનામસ્તોત્રમ્

અથ શ્રીત્રિપુરભૈરવીસહસ્રનામસ્તોત્રમ્

મહાકાલભૈરવ ઉવાચ

અથ વક્ષ્યે મહેશાનિ દેવ્યા નામસહસ્રકમ્ ।
યત્પ્રસાદાન્મહાદેવિ ચતુર્વર્ગફલલ્લભેત્ ॥ ૧ ॥

સર્વરોગપ્રશમનં સર્વમૃત્યુવિનાશનમ્ ।
સર્વસિદ્ધિકરં સ્તોત્રન્નાતઃ પરતઃ સ્તવઃ ॥ ૨ ॥

નાતઃ પરતરા વિદ્યા તીર્થન્નાતઃ પરં સ્મૃતમ્ ।
યસ્યાં સર્વં સમુત્પન્નય્યસ્યામદ્યાપિ તિષ્ઠતિ ॥ ૩ ॥

ક્ષયમેષ્યતિ તત્સર્વં લયકાલે મહેશ્વરિ ।
નમામિ ત્રિપુરાન્દેવીમ્ભૈરવીં ભયમોચિનીમ્ ।
સર્વસિદ્ધિકરીં સાક્ષાન્મહાપાતકનાશિનીમ્ ॥ ૪ ॥

અસ્ય શ્રીત્રિપુરભૈરવીસહસ્રનામસ્તોત્રસ્ય ભગવાન્ ઋષિઃ।
પઙ્ક્તિશ્છન્દઃ। આદ્યા શક્તિઃ। ભગવતી ત્રિપુરભૈરવી દેવતા ।
સર્વકામાર્થસિદ્ધ્યર્થે જપે વિનિયોગઃ ॥

ૐ ત્રિપુરા પરમેશાની યોગસિદ્ધિનિવાસિની ।
સર્વમન્ત્રમયી દેવી સર્વસિદ્ધિપ્રવર્ત્તિની ॥

સર્વાધારમયી દેવી સર્વસમ્પત્પ્રદા શુભા ।
યોગિની યોગમાતા ચ યોગસિદ્ધિપ્રવર્ત્તિની ॥

યોગિધ્યેયા યોગમયી યોગયોગનિવાસિની ।
હેલા લીલા તથા ક્રીડા કાલરૂપપ્રવર્ત્તિની ॥

કાલમાતા કાલરાત્રિઃ કાલી કામલવાસિની ।
કમલા કાન્તિરૂપા ચ કામરાજેશ્વરી ક્રિયા ॥

કટુઃ કપટકેશા ચ કપટા કુલટાકૃતિઃ ।
કુમુદા ચર્ચ્ચિકા કાન્તિઃ કાલરાત્રિપ્રિયા સદા ॥

ઘોરાકારા ઘોરતરા ધર્માધર્મપ્રદા મતિઃ ।
ઘણ્ટા ઘર્ગ્ઘરદા ઘણ્ટા ઘણ્ટાનાદપ્રિયા સદા ॥

સૂક્ષ્મા સૂક્ષ્મતરા સ્થૂલા અતિસ્થૂલા સદા મતિઃ ।
અતિસત્યા સત્યવતી સત્યસઙ્કેતવાસિની ॥

ક્ષમા ભીમા તથાઽભીમા ભીમનાદપ્રવર્ત્તિની ।
ભ્રમરૂપા ભયહરા ભયદા ભયનાશિની ॥

શ્મશાનવાસિની દેવી શ્મશાનાલયવાસિની ।
શવાસના શવાહારા શવદેહા શિવાશિવા ॥

કણ્ઠદેશશવાહારા શવકઙ્કણધારિણી ।
દન્તુરા સુદતી સત્યા સત્યસઙ્કેતવાસિની ॥

સત્યદેહા સત્યહારા સત્યવાદિનિવાસિની ।
સત્યાલયા સત્યસઙ્ગા સત્યસઙ્ગરકારિણી ॥

અસઙ્ગા સાઙ્ગરહિતા સુસઙ્ગા સઙ્ગમોહિની ।
માયામતિર્મહામાયા મહામખવિલાસિની ॥

ગલદ્રુધિરધારા ચ મુખદ્વયનિવાસિની ।
સત્યાયાસા સત્યસઙ્ગા સત્યસઙ્ગતિકારિણી ॥

અસઙ્ગા સઙ્ગનિરતા સુસઙ્ગા સઙ્ગવાસિની ।
સદાસત્યા મહાસત્યા માંસપાશા સુમાંસકા ॥

માંસાહારા માંસધરા માંસાશી માંસભક્ષકા ।
રક્તપાના રક્તરુચિરા રક્તા રક્તવલ્લભા ॥

રક્તાહારા રક્તપ્રિયા રક્તનિન્દકનાશિની ।
રક્તપાનપ્રિયા બાલા રક્તદેશા સુરક્તિકા ॥

સ્વયંભૂકુસુમસ્થા ચ સ્વયંભૂકુસુમોત્સુકા ।
સ્વયંભૂકુસુમાહારા સ્વયંભૂનિન્દકાસના ॥

સ્વયંભૂપુષ્પકપ્રીતા સ્વયંભૂપુષ્પસમ્ભવા ।
સ્વયંભૂપુષ્પહારાઢ્યા સ્વયંભૂનિન્દકાન્તકા ॥

કુણ્ડગોલવિલાસી ચ કુણ્ડગોલસદામતિઃ ।
કુણ્ડગોલપ્રિયકરી કુણ્ડગોલસમુદ્ભવા ॥

શુક્રાત્મિકા શુક્રકરા સુશુક્રા ચ સુશુક્તિકા ।
શુક્રપૂજકપૂજ્યા ચ શુક્રનિન્દકનિન્દકા ॥

રક્તમાલ્યા રક્તપુષ્પા રક્તપુષ્પકપુષ્પકા ।
રક્તચન્દનસિક્તાઙ્ગી રક્તચન્દનનિન્દકા ॥

મત્સ્યા મત્સ્યપ્રિયા માન્યા મત્સ્યભક્ષા મહોદયા ।
મત્સ્યાહારા મત્સ્યકામા મત્સ્યનિન્દકનાશિની ॥

કેકરાક્ષી તથા ક્રૂરા ક્રૂરસૈન્યવિનાશિની ।
ક્રૂરાઙ્ગી કુલિશાઙ્ગી ચ ચક્રાઙ્ગી ચક્રસમ્ભવા ॥

ચક્રદેહા ચક્રહારા ચક્રકઙ્કાલવાસિની ।
નિમ્નનાભી ભીતિહરા ભયદા ભયહારિકા ॥

ભયપ્રદા ભયભીતા અભીમા ભીમનાદિની ।
સુન્દરી શોભના સત્યા ક્ષેમ્યા ક્ષેમકરી તથા ॥

સિન્દૂરાઞ્ચિતસિન્દૂરા સિન્દૂરસદૃશાકૃતિઃ ।
રક્તારઞ્જિતનાસા ચ સુનાસા નિમ્નનાસિકા ॥

ખર્વા લમ્બોદરી દીર્ઘા દીર્ઘઘોણા મહાકુચા ।
કુટિલા ચઞ્ચલા ચણ્ડી ચણ્ડનાદપ્રચણ્ડિકા ॥

અતિચણ્ડા મહાચણ્ડા શ્રીચણ્ડાચણ્ડવેગિની ।
ચાણ્ડાલી ચણ્ડિકા ચણ્ડશબ્દરૂપા ચ ચઞ્ચલા ॥

ચમ્પા ચમ્પાવતી ચોસ્તા તીક્ષ્ણા તીક્ષ્ણપ્રિયા ક્ષતિઃ ।
જલદા જયદા યોગા જગદાનન્દકારિણી ॥

જગદ્વન્દ્યા જગન્માતા જગતી જગતક્ષમા ।
જન્યા જયજનેત્રી ચ જયિની જયદા તથા ॥

જનની ચ જગદ્ધાત્રી જયાખ્યા જયરૂપિણી ।
જગન્માતા જગન્માન્યા જયશ્રીર્જયકારિણી ॥

જયિની જયમાતા ચ જયા ચ વિજયા તથા ।

ખડ્ગિની ખડ્ગરૂપા ચ સુખડ્ગા ખડ્ગધારિણી ॥

ખડ્ગરૂપા ખડ્ગકરા ખડ્ગિની ખડ્ગવલ્લભા ।
ખડ્ગદા ખડ્ગભાવા ચ ખડ્ગદેહસમુદ્ભવા ॥

ખડ્ગા ખડ્ગધરા ખેલા ખડ્ગિની ખડ્ગમણ્ડિની ।
શઙ્ખિની ચાપિની દેવી વજ્રિણી શુલિની મતિઃ ॥

બલિની ભિન્દિપાલી ચ પાશી ચ અઙ્કુશી શરી ।
ધનુષી ચટકી ચર્મા દન્તી ચ કર્ણનાલિકી ॥

મુસલી હલરૂપા ચ તૂણીરગણવાસિની ।
તૂણાલયા તૂણહરા તૂણસમ્ભવરૂપિણી ॥

સુતૂણી તૂણખેદા ચ તૂણાઙ્ગી તૂણવલ્લભા ।
નાનાસ્ત્રધારિણી દેવી નાનાશસ્ત્રસમુદ્ભવા ॥

લાક્ષા લક્ષહરા લાભા સુલાભા લાભનાશિની ।
લાભહારા લાભકરા લાભિની લાભરૂપિણી ॥

ધરિત્રી ધનદા ધાન્યા ધન્યરૂપા ધરા ધનુઃ ।
ધુરશબ્દા ધુરામાન્યા ધરાઙ્ગી ધનનાશિની ॥

ધનહા ધનલાભા ચ ધનલભ્યા મહાધનુઃ ।
અશાન્તા શાન્તિરૂપા ચ શ્વાસમાર્ગનિવાસિની ॥

ગગણા ગણસેવ્યા ચ ગણાઙ્ગાવાગવલ્લભા ।
ગણદા ગણહા ગમ્યા ગમનાગમસુન્દરી ॥

ગમ્યદા ગણનાશી ચ ગદહા ગદવર્દ્ધિની ।
સ્થૈર્યા ચ સ્થૈર્યનાશા ચ સ્થૈર્યાન્તકરણી કુલા ॥

દાત્રી કર્ત્રી પ્રિયા પ્રેમા પ્રિયદા પ્રિયવર્દ્ધિની ।
પ્રિયહા પ્રિયભવ્યા ચ પ્રિયપ્રેમાઙ્ઘ્રિપાતનુઃ ॥

પ્રિયજા પ્રિયભવ્યા ચ પ્રિયસ્થા ભવનસ્થિતા ।
સુસ્થિરા  સ્થિરરૂપા ચ સ્થિરદા સ્થૈર્યબર્હિણી ॥

ચઞ્ચલા ચપલા ચોલા ચપલાઙ્ગનિવાસિની ।
ગૌરી કાલી તથા છિન્ના માયા માન્યા હરપ્રિયા ॥

સુન્દરી ત્રિપુરા ભવ્યા ત્રિપુરેશ્વરવાસિની ।
ત્રિપુરનાશિની દેવી ત્રિપુરપ્રાણહારિણી ॥

ભૈરવી ભૈરવસ્થા ચ ભૈરવસ્ય પ્રિયા તનુઃ ।
ભવાઙ્ગી ભૈરવાકારા ભૈરવપ્રિયવલ્લભા ॥

કાલદા કાલરાત્રિશ્ચ કામા કાત્યાયની ક્રિયા ।
ક્રિયદા ક્રિયહા ક્લૈબ્યા પ્રિયપ્રાણક્રિયા તથા ॥

ક્રીઙ્કારી કમલા લક્ષ્મીઃ શક્તિઃ સ્વાહા વિભુઃ પ્રભુઃ ।
પ્રકૃતિઃ પુરુષશ્ચૈવ પુરુષાપુરુષાકૃતિઃ ॥

પરમઃ પુરુષશ્ચૈવ માયા નારાયણી મતિઃ ।
બ્રાહ્મી માહેશ્વરી ચૈવ કૌમારી વૈષ્ણવી તથા ॥

વારાહી ચૈવ ચામુણ્ડા ઇન્દ્રાણી હરવલ્લભા ।
ભર્ગ્ગી માહેશ્વરી કૃષ્ણા કાત્યાયન્યપિ પૂતના ॥

રાક્ષસી ડાકિની ચિત્રા વિચિત્રા વિભ્રમા તથા ।
હાકિની રાકિની ભીતા ગંધર્વા ગંધવાહિની ॥

કેકરી કોટરાક્ષી ચ નિર્માંસાલૂકમાંસિકા ।
લલજ્જિહ્વા સુજિહ્વા ચ બાલદા બાલદાયિની ॥

ચન્દ્રા ચન્દ્રપ્રભા ચાન્દ્રી ચન્દ્રકાંતિષુ તત્પરા ।
અમૃતા માનદા પૂષા તુષ્ટિઃ પુષ્ટી રતિર્ધૃતિઃ ॥

શશિની ચન્દ્રિકા કાંતિજ્જર્યોત્સ્ના શ્રીઃ પ્રીતિરઙ્ગદા ।
પૂર્ણા પૂર્ણામૃતા કલ્પલતિકા કલ્પદાનદા ॥

સુકલ્પા કલ્પહસ્તા ચ કલ્પવૃક્ષકરી હનુઃ ।
કલ્પાખ્યા કલ્પભવ્યા ચ કલ્પાનન્દકવન્દિતા ॥

સૂચીમુખી પ્રેતમુખી ઉલ્કામુખી મહાસુખી ।
ઉગ્રમુખી ચ સુમુખી કાકાસ્યા વિકટાનના ॥

કૃકલાસ્યા ચ સન્ધ્યાસ્યા મુકુલીશા રમાકૃતિઃ ।
નાનામુખી ચ નાનાસ્યા નાનારૂપપ્રધારિણી ॥

વિશ્વાર્ચ્યા વિશ્વમાતા ચ વિશ્વાખ્યા વિશ્વભાવિની ।
સૂર્યા સૂર્યપ્રભા શોભા સૂર્યમણ્ડલસંસ્થિતા ॥

સૂર્યકાંતિઃ સૂર્યકરા સૂર્યાખ્યા સૂર્યભાવના ।
તપિની તાપિની ધૂમ્રા મરીચિજ્જ્વાલિની રુચિઃ ॥

સુરદા ભોગદા વિશ્વા બોધિની ધારિણી ક્ષમા ।
યુગદા યોગહા યોગ્યા યોગ્યહા યોગવર્દ્ધિની ॥

વહ્નિમણ્ડલસંસ્થા ચ વહ્નિમણ્ડલમધ્યગા ।
વહ્નિમણ્ડલરૂપા ચ વહ્નિમણ્ડલસઙ્જ્ઞકા ॥

વહ્નિતેજા વહ્નિરાગા વહ્નિદા વહ્નિનાશિની ।
વહ્નિક્રિયા વહ્નિભુજા કલા વહ્નૌ સ્થિતા સદા ॥

ધૂમ્રાર્ચિતા ચોજ્જ્વલિની તથા ચ વિસ્ફુલિઙ્ગિની ।
શૂલિની ચ સુરૂપા ચ કપિલા હવ્યવાહિની ॥

નાનાતેજસ્વિની દેવી પરબ્રહ્મકુટુમ્બિની ।
જ્યોતિર્બ્રહ્મમયી દેવી પ્રબ્રહ્મસ્વરૂપિણી ॥

પરમાત્મા પરા પુણ્યા પુણ્યદા પુણ્યવર્દ્ધિની ।
પુણ્યદા પુણ્યનામ્ની ચ પુણ્યગંધા પ્રિયાતનુઃ ॥

પુણ્યદેહા પુણ્યકરા પુણ્યનિન્દકનિન્દકા ।
પુણ્યકાલકરા પુણ્યા સુપુણ્યા પુણ્યમાલિકા ॥

પુણ્યખેલા પુણ્યકેલી પુણ્યનામસમા પુરા ।
પુણ્યસેવ્યા પુણ્યખેલ્યા પુરાણપુણ્યવલ્લભા ॥

પુરુષા પુરુષપ્રાણા પુરુષાત્મસ્વરૂપિણી ।
પુરુષાઙ્ગી ચ પુરુષી પુરુષસ્ય કલા સદા ॥

સુપુષ્પા પુષ્પકપ્રાણા પુષ્પહા પુષ્પવલ્લભા ।
પુષ્પપ્રિયા પુષ્પહારા પુષ્પવન્દકવન્દકા ॥

પુષ્પહા પુષ્પમાલા ચ પુષ્પનિન્દકનાશિની ।
નક્ષત્રપ્રાણહન્ત્રી ચ નક્ષત્રાલક્ષવન્દકા ॥

લક્ષ્યમાલ્યા લક્ષહારા લક્ષા લક્ષસ્વરૂપિણી ।
નક્ષત્રાણી સુનક્ષત્રા નક્ષત્રાહા મહોદયા ॥

મહામાલ્યા મહામાન્યા મહતી માતૃપૂજિતા ।

મહામહાકનીયા ચ મહાકાલેશ્વરી મહા ॥

મહાસ્યા વન્દનીયા ચ મહાશબ્દનિવાસિની ।
મહાશઙ્ખેશ્વરી મીના મત્સ્યગંધા મહોદરી ॥

લમ્બોદરી ચ લમ્બોષ્ઠી લમ્બનિમ્નતનૂદરી ।
લમ્બોષ્ઠી લમ્બનાસા ચ લમ્બઘોણા લલત્સુકા ॥

અતિલમ્બા મહાલમ્બા સુલમ્બા લમ્બવાહિની ।
લમ્બાર્હા લમ્બશક્તિશ્ચ લમ્બસ્થા લમ્બપૂર્વિકા ॥

ચતુર્ઘણ્ટા મહાઘણ્ટા ઘણ્ટાનાદપ્રિયા સદા ।
વાદ્યપ્રિયા વાદ્યરતા સુવાદ્યા વાદ્યનાશિની ॥

રમા રામા સુબાલા ચ રમણીયસ્વભાવિની ।
સુરમ્યા રમ્યદા રમ્ભા રમ્ભોરૂ રામવલ્લભા ॥

કામપ્રિયા કામકરા કામાઙ્ગી રમણી રતિઃ ।
રતિપ્રિયા રતિ રતી રતિસેવ્યા રતિપ્રિયા ॥

સુરભિઃ સુરભી શોભા દિક્ષોભાઽશુભનાશિની ।
સુશોભા ચ મહાશોભાઽતિશોભા પ્રેતતાપિની ॥

લોભિની ચ મહાલોભા સુલોભા લોભવર્દ્ધિની ।
લોભાઙ્ગી લોભવન્દ્યા ચ લોભાહી લોભભાસકા ॥

લોભપ્રિયા મહાલોભા લોભનિન્દકનિન્દકા ।
લોભાઙ્ગવાસિની ગંધવિગંધા ગંધનાશિની ॥

ગંધાઙ્ગી ગંધપુષ્ટા ચ સુગંધા પ્રેમગંધિકા ।
દુર્ગંધા પૂતિગંધા ચ વિગંધા અતિગંધિકા ॥

પદ્માન્તિકા પદ્મવહા પદ્મપ્રિયપ્રિયઙ્કરી ।
પદ્મનિન્દકનિન્દા ચ પદ્મસન્તોષવાહના ॥

રક્તોત્પલવરા દેવી રક્તોત્પલપ્રિયા સદા ।
રક્તોત્પલસુગંધા ચ રક્તોત્પલનિવાસિની ॥

રક્તોત્પલગ્રહામાલા રક્તોત્પલમનોહરા ।
રક્તોત્પલસુનેત્રા ચ રક્તોત્પલસ્વરૂપધૃક્ ॥

વૈષ્ણવી વિષ્ણુપૂજ્યા ચ વૈષ્ણવાઙ્ગનિવાસિની ।
વિષ્ણુપૂજકપૂજ્યા ચ વૈષ્ણવે સંસ્થિતા તનુઃ ॥

નારાયણસ્ય દેહસ્થા નારાયણમનોહરા ।
નારાયણસ્વરૂપા ચ નારાયણમનઃસ્થિતા ॥

નારાયણાઙ્ગસમ્ભૂતા નારાયણપ્રિયાતનુઃ ।
નારી નારાયણીગણ્યા નારાયણગૃહપ્રિયા ॥

હરપૂજ્યા હરશ્રેષ્ઠા હરસ્ય વલ્લભા ક્ષમા ।
સંહારી હરદેહસ્થા હરપૂજનતત્પરા ॥

હરદેહસમુદ્ભૂતા હરાઙ્ગવાસિનીકુહૂઃ ।
હરપૂજકપૂજ્યા ચ હરવન્દકતત્પરા ॥

હરદેહસમુત્પન્ના હરક્રીડાસદાગતિઃ ।
સુગણાસઙ્ગરહિતા અસઙ્ગાસઙ્ગનાશિની ॥

નિર્જના વિજના દુર્ગા દુર્ગક્લેશનિવારિણી ।
દુર્ગદેહાન્તકા દુર્ગારૂપિણી દુર્ગતસ્થિકા ॥

પ્રેતકરા પ્રેતપ્રિયા પ્રેતદેહસમુદ્ભવા ।
પ્રેતાઙ્ગવાસિની પ્રેતા પ્રેતદેહવિમર્દકા ॥

ડાકિની યોગિની કાલરાત્રિઃ કાલપ્રિયા સદા ।
કાલરાત્રિહરા કાલા કૃષ્ણદેહા મહાતનુઃ ॥

કૃષ્ણાઙ્ગી કુટિલાઙ્ગી ચ વજ્રાઙ્ગી વજ્રરૂપધૃક્ ।
નાનાદેહધરા ધન્યા ષટ્ચક્રક્રમવાસિની ॥

મૂલાધારનિવાસી ચ મૂલાધારસ્થિતા સદા ।
વાયુરૂપા મહારૂપા વાયુમાર્ગનિવાસિની ॥

વાયુયુક્તા વાયુકરા વાયુપૂરકપૂરકા ।
વાયુરૂપધરા દેવી સુષુમ્નામાર્ગગામિની ॥

દેહસ્થા દેહરૂપા ચ દેહધ્યેયા સુદેહિકા ।
નાડીરૂપા મહીરૂપા નાડીસ્થાનનિવાસિની ॥

ઇડ્ગલા પિઙ્ગલા ચૈવ સુષુમ્નામધ્યવાસિની ।
સદાશિવપ્રિયકરી મૂલપ્રકૃતિરૂપધૃક્ ॥

અમૃતેશી મહાશાલી શૃઙ્ગારાઙ્ગનિવાસિની ।
ઉપત્તિસ્થિતિસંહન્ત્રી પ્રલયાપદવાસિની ॥

મહાપ્રલયયુક્તા ચ સૃષ્ટિસંહારકારિણી ।
સ્વધા સ્વાહા હવ્યવાહા હવ્યા હવ્યપ્રિયા સદા ॥

હવ્યસ્થા હવ્યભક્ષા ચ હવ્યદેહસમુદ્ભવા ।
હવ્યક્રીડા કામધેનુસ્વરૂપા રૂપસમ્ભવા ॥

સુરભી નન્દની પુણ્યા યજ્ઞાઙ્ગી યજ્ઞસમ્ભવા ।
યજ્ઞસ્થા યજ્ઞદેહા ચ યોનિજા યોનિવાસિની ॥

અયોનિજા સતી સત્યા અસતી કુટિલાતનુઃ ।
અહલ્યા ગૌતમી ગમ્યા વિદેહા દેહનાશિની ॥

ગાંધારી દ્રૌપદી દૂતી શિવપ્રિયા ત્રયોદશી ।
પઞ્ચદશી પૌર્ણમાસી ચતુર્દશી ચ પઞ્ચમી ॥

ષષ્ઠી ચ નવમી ચૈવ અષ્ટમી દશમી તથા ।
એકાદશી દ્વાદશી ચ દ્વારરૂપીભયપ્રદા ॥

સઙ્ક્રાન્ત્યા સામરૂપા ચ કુલીના કુલનાશિની ।
કુલકાન્તા કૃશા કુમ્ભા કુમ્ભદેહવિવર્દ્ધિની ॥

વિનીતા કુલવત્યર્થી અન્તરી ચાનુગાપ્યુષા ।
નદીસાગરદા શાન્તિઃ શાન્તિરૂપા સુશાન્તિકા ॥

આશા તૃષ્ણા ક્ષુધા ક્ષોભ્યા ક્ષોભરૂપનિવાસિની ।
ગઙ્ગાસાગરગા કાન્તિઃ શ્રુતિઃ સ્મૃતિર્દ્ધૃતિર્મહી ॥

દિવારાત્રિઃ પઞ્ચભૂતદેહા ચૈવ સુદેહકા ।
તણ્ડુલા સ્છિન્નમસ્તા ચ નાગયજ્ઞોપવીતિની ॥

વર્ણિની ડાકિની શક્તિઃ કુરુકુલ્લા સુકુલ્લકા ।
પ્રત્યઙ્ગિરાઽપરા દેવી અજિતા જયદાયિની ॥

જયા ચ વિજયા ચૈવ મહિષાસુરઘાતિની ।
મધુકૈટભહન્ત્રી ચ ચણ્ડમુણ્ડવિનાશિની ॥

નિશુમ્ભશુમ્ભહનની રક્તબીજક્ષયઙ્કરી ।

કાશી કાશીનિવાસી ચ મધુરા પાર્વતી પરા ॥

અપર્ણા ચણ્ડિકા દેવી મૃડાની ચામ્બિકા કલા ।
શુક્લા કૃષ્ણા વર્ણવર્ણા શરદિન્દુકલાકૃતિઃ ॥

રુક્મિણી રાધિકા ચૈવ ભૈરવ્યાઃ પરિકીર્ત્તિતમ્ ।
અષ્ટાધિકસહસ્રન્તુ દેવ્યા નામાનુકીર્ત્તનાત્ ॥

મહાપાતકયુક્તોઽપિ મુચ્યતે નાત્ર સંશયઃ ।
બ્રહ્મહત્યા સુરાપાનં સ્તેયઙ્ગુર્વઙ્ગનાગમઃ ॥

મહાપાતકકોટ્યસ્તુ તથા ચૈવોપપાતકાઃ ।
સ્તોત્રેણ ભૈરવોક્તેન સર્વન્નશ્યતિ તત્ક્ષણાત્ ॥

સર્વવ્વા શ્લોકમેકવ્વા પઠનાત્સ્મરણાદપિ ।
પઠેદ્વા પાઠયેદ્વાપિ સદ્યો મુચ્યેત બન્ધનાત્ ॥

રાજદ્વારે રણે દુર્ગે સઙ્કટે ગિરિદુર્ગ્ગમે ।
પ્રાન્તરે પર્વતે વાપિ નૌકાયાવ્વા મહેશ્વરિ ॥

વહ્નિદુર્ગભયે પ્રાપ્તે સિંહવ્યાઘ્રભ્યાકુલે ।
પઠનાત્સ્મરણાન્મર્ત્ત્યો મુચ્યતે સર્વસઙ્કટાત્ ॥

અપુત્રો લભતે પુત્રન્દરિદ્રો ધનવાન્ભવેત્ ।
સર્વશાસ્ત્રપરો વિપ્રઃ સર્વયજ્ઞફલલ્લભેત્ ॥

અગ્નિવાયુજલસ્તમ્ભઙ્ગતિસ્તમ્ભવિવસ્વતઃ ।
મારણે દ્વેષણે ચૈવ તથોચ્ચાટે મહેશ્વરિ ॥

ગોરોચનાકુઙ્કુમેન લિખેત્સ્તોત્રમનન્યધીઃ ।
ગુરુણા વૈષ્ણવૈર્વાપિ સર્વયજ્ઞફલલ્લભેત્ ॥

વશીકરણમત્રૈવ જાયન્તે સર્વસિદ્ધયઃ ।
પ્રાતઃકાલે શુચિર્ભૂત્વા મધ્યાહ્ને ચ નિશામુખે ॥

પઠેદ્વા પાઠયેદ્વાપિ સર્વયજ્ઞફલલ્લભેત્ ।
વાદી મૂકો ભવેદ્દુષ્ટો રાજા ચ સેવકો યથા ॥

આદિત્યમઙ્ગલદિને ગુરૌ વાપિ મહેશ્વરિ ।
ગોરોચનાકુઙ્કુમેન લિખેત્સ્તોત્રમનન્યધીઃ ॥

ગુરુણા વૈષ્ણવૈર્વાપિ સર્વયજ્ઞફલલ્લભેત્ ।
ધૃત્વા સુવર્ણમધ્યસ્થં સર્વાન્કામાનવાપ્નુયાત્ ॥

સ્ત્રીણાવ્વામકરે ધાર્યમ્પુમાન્દક્ષકરે તથા ।
આદિત્યમઙ્ગલદિને ગુરૌ વાપિ મહેશ્વરિ ॥

શનૈશ્ચરે લિખેદ્વાપિ સર્વસિદ્ધિં લભેદ્ધ્રુવમ્ ।
પ્રાન્તરે વા શ્મશાને વા નિશાયામર્દ્ધરાત્રકે ॥

શૂન્યાગારે ચ દેવેશિ લિખેદ્યત્નેન સાધકઃ ।
સિંહરાશૌ ગુરુગતે કર્ક્કટસ્થે દિવાકરે ॥

મીનરાશૌ ગુરુગતે લિખેદ્યત્નેન સાધકઃ ।
રજસ્વલાભગન્દૃષ્ટ્વા તત્રસ્થો વિલિખેત્સદા ॥

સુગંધિકુસુમૈઃ શુક્રૈઃ સુગંધિગંધચન્દનૈઃ ।
મૃગનાભિમૃગમદૈર્વિલિખેદ્યત્નપૂર્વકમ્ ॥

લિખિત્વા ચ પઠિત્વા ચ ધારયેચ્ચાપ્યનન્યધીઃ ।
કુમારીમ્પૂજયિત્વા ચ નારીશ્ચાપિ પ્રપૂજયેત્ ॥

પૂજયિત્વા ચ કુસુમૈર્ગ્ગન્ધચન્દનવસ્ત્રકૈઃ ।
સિન્દૂરરક્તકુસુમૈઃ પૂજયેદ્ભક્તિયોગતઃ ॥

અથવા પૂજયેદ્દેવિ કુમારીર્દ્દશમાવધીઃ ।
સર્વાભીષ્ટફલન્તત્ર લભતે તત્ક્ષણાદપિ ॥

નાત્ર સિદ્ધાદ્યપેક્ષાસ્તિ ન વા મિત્રારિદૂષણમ્ ।
ન વિચાર્યઞ્ચ દેવેશિ જપમાત્રેણ સિદ્ધિદમ્ ॥

સર્વદા સર્વકાર્યેષુ ષટ્સાહસ્રપ્રમાણતઃ ।
બલિન્દત્ત્વા વિધાનેન પ્રત્યહમ્પૂજયેચ્છિવામ્ ॥

સ્વયંભૂકુસુમૈઃ પુષ્પૈર્બ્બલિદાનન્દિવાનિશમ્ ।
પૂજયેત્પાર્વતીન્દેવીમ્ભૈરવીન્ત્રિપુરાત્મિકામ્ ॥

બ્રાહ્મણાન્ભોજયેન્નિત્યન્દશકન્દ્વાદશન્તથા ।
અનેન વિધિના દેવિ બાલાન્નિત્યમ્પ્રપૂજયેત્ ॥

માસમેકમ્પઠેદ્યસ્તુ ત્રિસન્ધ્યવ્વિધિનામુના ।
અપુત્રો લભતે પુત્રન્નિર્દ્ધનો ધનવાન્ભવેત્ ॥

સદા ચાનેન વિધિના તથા માસત્રયેણ ચ ।
કૃતકાર્યં ભવેદ્દેવિ તથા માસચતુષ્ટયે ॥

દીર્ઘરોગાત્પ્રમુચ્યેત પઞ્ચમે કવિરાડ્ભવેત્ ।
સર્વૈશ્વર્યં લભેદ્દેવિ માસષટ્કે તથૈવ ચ ॥

સપ્તમે ખેચરત્વઞ્ચ અષ્ટમે ચ વૃહદ્દ્યુતિઃ ।
નવમે સર્વસિદ્ધિઃ સ્યાદ્દશમે લોકપૂજિતઃ ॥

એકાદશે રાજવશ્યો દ્વાદશે તુ પુરન્દરઃ ।
વારમેકમ્પઠેદ્યસ્તુ પ્રાપ્નોતિ પૂજને ફલમ્ ॥

સમગ્રં શ્લોકમેકવ્વા યઃ પઠેત્પ્રયતઃ શુચિઃ ।
સ પૂજાફલમાપ્નોતિ ભૈરવેણ ચ ભાષિતમ્ ॥

આયુષ્મત્પ્રીતિયોગે ચ બ્રાહ્મૈન્દ્રે ચ વિશેષતઃ ।
પઞ્ચમ્યાઞ્ચ તથા ષષ્ઠ્યાય્યત્ર કુત્રાપિ તિષ્ઠતિ ॥

શઙ્કા ન વિદ્યતે તત્ર ન ચ માયાદિદૂષણમ્ ।
વારમેકં પઠેન્મર્ત્યો મુચ્યતે સર્વસઙ્કટાત્ ।
કિમન્યદ્બહુના દેવિ સર્વાભીષ્ટફલલ્લભેત્ ॥

॥ ઇતિ શ્રીવિશ્વસારે મહાભૈરવવિરચિતં
શ્રીમત્ત્રિપુરભૈરવીસહસ્રનામસ્તોત્રં સમાપ્તમ્ ॥

The original text is
from Muktabodha Indological Research Institute
www.muktabodha.org
Data-entered by the staff of Muktabodha under the direction of Mark S. G. Dyczkowski.
Reprint of edition published in 1892. Revision 0 february 9, 2009
Publisher : Shrivenkateshvara press Publication year : 1949
Reproofread by DPD

*Shri TripurabhairavI Sahasranamastotram*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*